www.thearyasamaj.org

मार्च २०१६ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

# आत्मतत्त्व-ज्ञानी भव

-डॉ. रामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः, खेकड़ा
बागपत-२५०१०१ (उत्तरप्रदेशः)

(१)

बहुविद्वद्भिरात्मतत्त्व - ज्ञान - प्रयत्नः कृतः ।
परं तेषु नहि कश्चिदात्मतत्त्वपारं गतः ॥

(२)

आत्मनोऽनुभूतिमार्गे किं स्वरूपं तस्यात्मनः ?।
का च स्थितिरस्ति तस्य नात्र कोऽपि ज्ञातुं क्षमः ॥

(३)

देवीभागवत-ग्रन्थे सुलभा-जनक-द्वयोः ।
संवादे स्थितिस्तस्य सम्यग्रूपेण ज्ञापिता ॥

(४)

श्रीमद्भगवद्गीतायामर्जुनस्याऽन्तर्मानसम् ।
बोधता श्रीकृष्णेनाऽऽत्मतत्त्वस्योपदेशः कृतः ॥

(५)

शतपथ-ब्राह्मणो चाऽव्यय-पुरुषस्य मनः ।
प्राणवायुना सम्मिल्य क्षमं सृष्टि-सम्पादने ॥

(६)

तदेव सर्वेषामात्मा यन्नित्यं नवरूपदम् ।
किमेतद् भवति लोके ? तदेव माया कथ्यते ॥

(७)

ज्ञातुं न शक्यते माया, कथ्यते सा स ईश्वरः ।
येन चराचरं सर्वं, जगदस्ति नियन्त्रितम् ॥

(८)

अतः सर्वं विहाय त्वमात्म-तत्त्व-ज्ञानी भव ।
रामकिशोरमिश्रेण प्रोक्तविषयो वर्णितः ॥

www.thearyasamaj.org

दूरभाषः - ९२१९४०६०७८
९२१९४०६०७४

# भारतोदयः

संस्कृत - मासिकपत्रम्

वर्षम् - १०६ अङ्कः - ९

*सम्पादकः*
**डॉ. हरिगोपालशास्त्री**
*व्याकरणाचार्यः*
*एम.ए., पीएच. डी.*
**राष्ट्रपति-पुरस्कृतः**

*सह - सम्पादकः*
**डा.केशवप्रसाद उपाध्यायः**
*साहित्याचार्यः*
*एम.ए., पीएच. डी.*

*प्रबन्ध - सम्पादकः*
**डॉ. अजयकौशिकः**
*साहित्याचार्यः*
*एम.ए., पीएच. डी.*

*प्रकाशकः*
गुरुकुलमहाविद्यालयः ज्वालापुरम्
*हरिद्वारम्-२४९४०४*
*(उत्तराखण्ड-प्रदेशः)*

**शुल्क - विवरणम्**

| | |
|---|---|
| प्रत्यङ्कम् | ५/- |
| वार्षिकम् | ५०/- |
| आजीवनम् | ५००/- |

## विषयानुक्रमणिका

| | | |
|---|---|---|
| १. श्रुति-सुधा | -महर्षिदयानन्दसरस्वती | ०३ |
| २. मायापुरी (५) | -डॉ. निरञ्जनमिश्रः | ०४ |
| ३. विद्योत्तमा (३) | -डॉ. आचार्यरामकिशोरमिश्रः | ०८ |
| ४. संस्कृत-भाषायां स्वराष्ट्र-चिन्तनम् | -डॉ. महावीर-अग्रवालः | १३ |
| ५. भारतोदय-प्रकाशन-विवरणम् | -डॉ. हरिगोपालशास्त्री | १८ |
| ६. हिन्दी-गीतस्य संस्कृतेऽनुवादः (तेरे मेरे मिलन की ये रैना' इत्यस्य) | -डॉ. प्रकाशचन्द्रः पन्तः | १९ |
| ७. साभिवादनमीश-स्तुतिः | -श्री पं. दिलीपदत्त उपाध्यायः | १९ |
| ८. राष्ट्रोन्नयनं सर्वैः करणीयम् | -डॉ. रणजीत झा | १४ |

राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्
भारतोदयः(संस्कृत-मासिकम्)
(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, पत्रालयः - गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम) |

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि, यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

www.thearyasamaj.org

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

| वर्षम्- १०६ | चैत्र २०७३ विक्रमाब्दः ❋ मार्च २०१६ ईसवीयाब्दः | अङ्कः- ९ |
|---|---|---|

## ❋ श्रुति-सुधा ❋

ओ३म् इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि ।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्त्स्याम ॥

-ऋग्वेदः १/१०/५१/१५

पदार्थः -

(**इदम्**) प्रत्यक्षम् (**नमः**) सत्करणम् (**वृषभाय**) सुखवृष्टेः कर्त्रे (**स्वराजे**) स्वयं राजते, तस्मै सर्वाधिपतये परमेश्वराय (**सत्यशुष्माय**) सत्यमविनश्वरं शुष्मं बलं यस्य, तस्मै (**तवसे**) बलाय। (**अवाचि**) उच्यते (**अस्मिन्**) वक्ष्यमाणे (**इन्द्र**) सत्करणीय सभाध्यक्ष (**वृजने**) वर्जन्ति दुःखानि येन बलेन, तस्मिन् (**सर्ववीराः**) सर्वे च वीराश्च ते सर्ववीराः (**स्मत्**) श्रेष्ठार्थे (**सूरिभिः**) मेधाविभिः सह (**तव**) ( **शर्मन्** ) शर्मणि गृहे (**स्याम**) भवेम॥ १५॥

भावार्थः -

सर्वैर्मनुष्यैर्विद्वद्भिः सह वर्त्तमानैर्भूत्वा परमेश्वरस्योपासनां पूर्णप्रीत्या विद्वत्सङ्गं च कृत्वाऽस्मिन् संसारे परमानन्द-प्राप्तव्यः प्रापयितव्यश्चेति ॥ १५॥

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ११ पृष्ठे ]

www.thearyasamaj.org



# मायापुरी (५)

-डॉ: निरञ्जनमिश्र:, सहाचार्य: (साहित्यम्)
श्रीभगवानदास-आदर्श-संस्कृतमहाविद्यालय:,
हरिद्वारम्-२४९४०४ ( उत्तराखण्डम् )

(८०)

उदयति यदि पुण्यानां प्रभाव: कदाचित् ,
व्रजति यदि विनाशं पाप-राशि: कदाचित् ।
ऋषि-मुनि-जन-वन्द्या स्वर्वधूनां नमस्या ,
सकल-नयन-तृप्ति: दृष्टि-पूता तदैव ।।

(८१)

तरङ्गमाला मधुरं नदन्ती,
समागतानां सुयश: वदन्ती।
देवोऽपि पुण्यैर्भवतीह दास:,
धरातलस्थान् दिशतीव भाति।।

(८२)

दिनकर-पद-घातात् शैलराजाधिराज: ,
प्रतिबलपदशक्तेर्दैन्यमाकल्प्य नूनम् ।
वदन-जनित-विन्दूनां प्रकल्प्यैव धारां ,
हरति धरणिजानां शैत्यमाकल्प्य तापम् ॥

(८३)

वहति गिरि-सुतेयं शान्तनो धर्मपत्नी ,
विवश-विमल-वीराणां धुरीणस्य माता ।
अमल-भरत-कर्तुर्जन्मन: साक्षिणीयं ,
ऋषिवर-वरजह्नोर्जह्नुजाता सुपुत्री ॥

(८४)

यस्या: दर्शनमेव जीवन-फलं मत्वा तदाराधनां ,
कर्तुं भौतिक-सौख्यपूतभवनं त्यक्त्वा समायान्ति ये ।
तेषां पाद-रज: करोति वदने पूर्वं हि सा स्वार्चनात् ,
धन्यास्तेऽतिथयस्तथा गुणवती, सा याऽतिथेयाश्रिता ।।

धारा-द्वयान्तर्गत रक्त-प्रस्तर-निर्मित-कुट्टिमे भक्ति-भाव-भरितान्त:करणा: देव-स्वरूपा: सकलैहिक-कामनामपहायालौकिकाचिन्त्य-भाव-सिन्धु-निमग्ना: पुष्प-दल-पूर्ण-पलाश-पात्रे प्रज्ज्वलित-दीपमादाय सुरस्रोतस्विन्या: आरार्तिक्य-निवेदनाय सजास्तिष्ठन्ति। तत्र पुष्प-विक्रेत्र्य: देव-सभायां सुर-ललनेव परिभ्रमन्ति। कश्चिदपि जन: आराधना-भङ्गतां न लभेदिति मनसि निधाय सर्वेषां हस्ते पुष्प-प्रदानाय कृत-सङ्कल्पा: मानव-कर्दमेऽपि गमनागमन-सङ्घट्टनं सोढ्वाऽप्यविकला: प्रसन्ना: परिभ्रमन्ति। लौकिक-सुखास्वाद-तुष्ट-सभ्यानाम् उपवेशन-कष्टापसारण-कुशला: सज्जना: सद्य उपयोगीन्यासनानि तत्रैव समुपस्थापयन्ति।

निरन्तर-श्रम-रताया: अविकलाया: गङ्गाया: सेवा-विधौ प्रवीणा: गंगा-सभाया: सैनिका:

www.thearyasamaj.org

समागतानां सौभाग्योदयमाकलय्य दान-स्वरूपं सेवा-शुल्कं सङ्गृह्यैकत्रीकुर्वन्ति। तेषां सैनिकानां नील-वस्त्रधारिणां निरन्तरं कार्य-रतानां प्रयासात् पुण्योदय-प्रभाव-परिचिताः सज्जनाः निर्बन्धाः भूत्वा प्रसन्नमनसा दान-मार्गे प्रवृत्ताः भवन्ति। अहो! सैनिकानामिह वाक्चातुरी यया शक्त्या कार्पण्य-रोगिणोऽपि सद्यः रोग-मुक्ताः भवन्ति। कदाचित् श्रेष्ठानुगमनेन लघवोऽपि पूज्याः भवन्तीति पुष्प-संसर्गात् शिव-शिरसि स्थितकीट इव। अस्मिन्नेव कुट्टिमोद्देशे अत्युत्तुङ्गं वर्तते वाटिका-गृहम्। दूरादेव समय-ज्ञाने समर्थाः भवन्ति लोकाः। अत्रोपविष्टाः जनाः अपूर्वानन्दमनुभवन्ति। अध्यात्म-भौतिकयोस्सङ्गमे स्थितानां परित उभयोः स्थितिः स्ववैशिष्ट्यमुपस्थापयन्तीव भासते।

भौतिक-बल-विलासात् विलसन्ति सेतवः जनानां गमनागमन-कष्ट-निवारणाय सज्जाः जडाः अपि सेतवः भक्त-पाद-धूलि-पवित्रिताः स्वात्मानं धन्यं मन्यन्ते। लौह-शृङ्खला-करैः नित्यं गङ्गा-जलं संस्पृश्यात्मानं पुनन्त्येते। नित्यं जन-कर्दम-पद-भारक्लान्तोऽपि प्रसन्न-वदनाः स्वकार्य-निरताः अविश्रान्ताः परहित-समर्पित-जीवनाः योगिनः इव तिष्ठन्ति।

एकतो धवल-मणि-निर्मित-सोपानानि रमणीय-शोभां जनयन्ति। तेषु सोपानेषु पङ्क्ति-बद्धाः सहृदयाः अमृत-विन्दु-पानायोपविष्ट-देवा इव प्रतिभान्ति। तरङ्ग-माला-ध्वनिः विश्व-मोहिन्याः नूपुर-ध्वनिरिव प्रतीयते। स्वयं भगवती भागीरथी तत्रोपविष्टानां समागतानां क्लान्तानां भक्तानां पाद-प्रक्षालनं करोति। अहो सेवा-भाव-निदर्शनम्। अस्मिन् भौतिकेऽपि युगे रवि-कर-ताप-तप्त-सोपानेऽपि पद-त्राणं न धरन्ति भक्ताः, पार्थिव-शरीरस्य कष्टं न गणयन्ति यशःशरीर-लुब्धाः।

चतुर्दिक्षु तुङ्गेषु विशाल-पट्टकेषु विद्युत्-प्रवाह-बलात् स्वप्नलोक इव विविध-विज्ञापनानि आयान्ति यान्ति च। अखण्ड-ब्रह्माण्ड-नियन्ता इव तन्नियन्ता अपि न दृश्यते कदाचित्। पट्टोऽयं जगल्लीलां निर्दिशति। क्षणे क्षणे चित्र-परिवर्तनं परिवर्तन-शीलस्य जगतः चरित्रमिव दर्शयति।

(८५)

**यत्पश्यति न तल्लोके ,**<br>
**यल्लोके तन्न पश्यति ।**<br>
**कं पश्यति च किं लोके ,**<br>
**को वदेत् विधिना विना ॥**

दर्शन-जनित-पुण्यावलोकनं कर्तुं शक्नुवन्ति सर्वे सततं चर्मचक्षुषाऽपि। आजीवनं मुखेन सदाचारिणोऽप्यत्र कर्मणा सदाचारिणो भवन्ति, भवतु नाम क्षणं यावदेव। कृपणताऽपि दातृत्वं वाञ्छति, काकोऽपि हंस इवाचरति, दुर्जनताऽपि सज्जनताम् अनुकरोति, स्पर्शनस्यैव फलमेतत्।

www.thearyasamaj.org

(८६)

यस्याः स्पर्शनमात्रेण, दुर्वृत्तिर्निज-नर्तनम् ।
त्यक्तुं वाञ्छति किं तस्याः, सततं चिन्तनेन वै ॥

(८७)

शिव-स्मरण-लाभेन पाप-प्रशमनं भवेत् ।
तस्याः भूषण-भूतायाः स्पर्शनेन न किं भवेत् ॥

(८८)

तापं सदा हरति पापमपाकरोति,
शान्तिं प्रयच्छति शुचिं मनसः करोति।
स्वर्गं प्रदर्शयति पूतयतीह लोकं
सर्वं शुभं दिशति पुण्यमयीह गङ्गा ॥

(८९)

शृङ्गान्निपत्य गिरिजा-जनकस्य धारा
सर्वौषधीय-गुण-सङ्ग्रहणं विधाय।
पीयूषतामुपगताऽमरलोक - मार्गं
लोकान् दिशत्यविरला सरला च गङ्गा ॥

प्रालेयाचल-तनया-तरङ्गालिङ्गन-चटुल-पवन-स्पर्शापगमनस्य, समुत्थित-पुण्य-प्रवाहस्य विकसित-मनःकुड्मलस्य, प्राप्तालौकिक-प्रभावस्य विगत-संसार-रागस्य प्रफुल्लित-चेतसः, प्रकटित-सत्व-विकारस्य जागृत-चेतसश्चेतसि समुद्भूतः कश्चित् दिव्य-भाव-प्रवाहः।

अहो! धातुरलौकिकत्वम्! माया-विलास-मञ्च-प्रभाऽन्धकारि-तनयानामग्रे परम-पुण्य-प्रवाहां, स्वर्ग-सोपान-पङ्क्तिः सद्यः पापापसारण-कुशलां माया-ग्रन्थिच्छेदन-चतुरां सर्वगुण-सम्पन्न-प्रभा-पुञ्ज-पाद-तलोद्गतां जरामरणावरोधिनीं, यम-पुरन्दर-प्रासाद-कपाटार्गलां प्रवाहयति। तरङ्ग-ध्वनि-व्याजेनावबोधयति लोकान्, अयि मायापहृत-विचारनेत्राः! पश्यत पश्यत! अपूर्वानन्द-सन्दोह-धारा प्रवहति तवाग्रे, स्पर्श-मात्रेण माया-बन्धन-जनित-व्याधिमुक्ताः भवथ। सान्निध्य-मात्रेण विकसित-विचाराः, पान-मात्रेण पुण्य-स्वरूपाः, दर्शन-मात्रेण लब्ध-जीवनाः भवथ।

स्नानानन्तरं तु किमपि वक्तुं न शक्नोति अमल-धवल-कमलासनाऽपि। तथापि मीलित-नयनानां विचार-नेत्रोन्मीलनं न भवति। व्याधि-पीडिताः दारिद्र्योपहताः बुभुक्षा-ग्रस्ताः पिपासा-त्रस्ताः जर्जर-वदनाः विगलित-दशनाः दिगम्बराः माया-नर्तन-मञ्च-सौन्दर्य-परिवर्धन-कुशल-प्रकाश-रेखामेव जीवन-प्रयोजनमामनन्ति। विद्युज्जनित-चाकचिक्यापहृत-दृष्टयो न पश्यन्ति चिर-स्थायिनं परमानन्द-प्रवाहम्। विचित्रोऽयं मानवः। नेत्रे सत्यपि सत्यं न पश्यति, श्रवण-युगल-समन्वितोऽपि न शृणोत्यार्तनादम्, सपादोऽपि पाप-पङ्कात् दूरं न याति, न जाने केन कदा वा परिवर्तिता बुद्धिः। असत्यमेव सत्यं जानाति, अनुचितस्यैवौचित्यं साधयति, विषमेवामृतमिवाहरति, कृष्णमर्जुनमिव व्यवहरति, जीवितं जड़ं वदति, जीवनायान्तकम्

www.thearyasamaj.org

आह्वयति, भोगार्थं योगं भजते, कमलाऽवलोकनाय शारदां सेवते, वञ्चनाय साधुत्वमाचरति। हं हो! अस्मिन्नेव लोके अलौकिकत्व-दर्शनं भवति। सनेत्राः विलसन्ति धृतराष्ट्राः, लब्धासन्दाः भवन्ति विज्ञाः, वस्त्रेण ज्ञायन्ते साधवः, भिक्षवोऽपि स्थानमादाय कलहायन्ते, दानापेक्षिणो विलसन्ति दातारः, प्रासादं निर्मापयन्ति यतयः।

तावदारार्तिक्य-दर्शनाय जागृतानि विद्युद्दीप-नयनानि। पर्वत-शिखरे मनसा देव्याः मन्दिर-शिरसि विद्युद्दीपनस्तथा जागृतः, मन्ये स्वयं मनसा नेत्रमुद्घाटितवती। गुञ्जितः शङ्ख-नादः **'जय गङ्गे माता'** इति ध्वनि-विस्तारक-यन्त्रैर्गीयमाना कोकिल-कण्ठ्या गीत-पङ्क्तिः लोकानां श्रवणान्याचकर्ष। गीतमनुगायतां पूतात्मनां चेतसि साक्षात् भागीरथी समवतीर्णाऽभवत्। पुष्प-पात्रस्थ-प्रज्वलित-दीप-माला-खचिता तरङ्गमालाऽपूर्वामलौकिकीं शोभां प्रसारयन्ती चेतसस्तमः अपहरन्ती सत्यं विकासयन्ती रजः अवरोधयन्ती कामप्यलौकिक-नृत्य-कलां प्रदर्शयन्तीवाभवत्।

शनैः शनैः जनानां समूहः भगवतीं भागीरथीं प्रणम्य स्वावासम्प्रत्यचलत्। अहमपि जल-स्पर्शेनात्मानं पूतं विधाय तस्यैवानुसरणमकुर्वम्। तावत् जनानामपसरणं वीक्ष्य शनैःशनैः समस्तं दिग्विभागं स्वाञ्चलेनाच्छादयन्ती, सत्व-प्रकाशं तमसा तिरस्कुर्वन्ती, उलूकानामोदयन्ती, चक्रवाकान् रोदयन्ती, समस्त-सज्जन-कार्यानवरोधयन्ती, दुर्जन-कर्म-मार्गं प्रकाशयन्ती, कुलजां गृहं प्रेषयन्तीं, कुलटाञ्च गृहान्निसरितुमाज्ञापयन्ती, खल-जन-चित्त-वृत्तिरिव मार्गं शून्यं कुर्वन्ती, आपणबधूनामवगुण्ठन-कपाटं पातयन्ती, निशाचरान् कार्याय सम्प्रेरयन्ती समायाता रजनी। परलोकं गता दिवाकर-श्रीः। मालिन्यपराजिताऽभवत् पद्मिनी। स्वार्थ-परवश-जन इव मधुकराः कमलिनी-कोषमपहाय कुमुदिनीं तोषयितुं जग्मुः। सर्वत्र कृत्रिम-विद्युत्-वर्तिकायाः प्रकाशोऽभवत्। हं हो! मानवानां बुद्धिः! तिमिर-प्राङ्गणेऽपि प्रकाशविलासमकरोत्। स्वयं निशाऽपि विस्मिता वर्तते। तिमिराच्छन्ने आकाश-प्राङ्गणे तारकानां विलासं प्रारभत्। निशीथिनी-नाथ-स्वागतार्थं सज्जितस्यास्य मञ्चस्य शोभा नावलोक्यते कृत्रिम-विद्युत्-प्रकाश-भारात्।

निशापतिमभिलषन्ती कुमुदिनी क्वचित् कानने स्थिता विगताशेव भाति। शनैः-शनैः जनपद-भारात् श्रान्ता रथ्या निःश्वास-ततिं तत्याज। केवलमविरल-वाहिन्याः कल-कल-निनादः श्रवण-गोचरीभवति। गङ्गा-धारयोर्मध्ये विस्तृते मणि-कुट्टिमे परम-शान्तिमनुभवन्तो जनाः शय्या-सुखमप्यनुभवितुं प्रयत्न-शीला अभवन्।

www.thearyasamaj.org

जनवरी–फरवरी–२०१६ मासादनुवृत्तम्

# ❋ विद्योत्तमा (३) ❋

–डॉ. आचार्यरामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृविभागाध्यक्षः
महामना–मालवीय–महाविद्यालयः,
खेकड़ा, बागपत, (उ.प्र.)

(६)

कथय भैरव! राजकुमार्या अधुना किं वृत्तमस्तीति शिवनाथोक्तमाकर्ण्य 'स्वस्मिन् कक्षे पर्यङ्के सा पतिता स्वभाग्यानि रोदितितमाम्। गुरुदेव! सा सम्प्रति पण्डितानामपमानफलं भुङ्क्ते।' इत्युक्ते भैरव–नाथे गुरुकुल–सेवकेन सूचितम्– गुरुदेव! स कालिदासः समागतो वृत्तपिपृच्छुभिर्विद्यार्थिभिः परिवृतो बहिरास्ते। शीघ्रमाहूयतां सः इति गुरुदेवादेशेनाऽऽहूतः स गुरुवर्यं प्रणमाम। कुतः समायातोऽसीति पृष्टो राजकुमारी–समीपादागतोऽस्मि गुरुदेव! इत्युक्तवन्तं त्वां सा पतिं मन्यते न वेति पृष्टे, 'सा मामधीतमपि पतिमङ्गीकरोति नो गुरुवर! साम्प्रतमहं तस्याः प्रश्नोत्तर–प्रदाने सक्षमोऽभूवं, तर्हि सा मम कवित्वं दिदृक्षते, कथयति च यदहमाचार्येण प्रतारिताऽस्मि त्वादृशं मूर्खं मौनपण्डितमुद्घोष्य।

त्वां मूर्खमहं स्वप्रतिज्ञया पतिं न मन्ये इत्युत्तरिते 'पुनस्त्वं क्व च गत आसी' रिति पृष्टे 'एकेन महात्मना साकमहमुज्जयिनीं गतवानासम्। तत्रैव गुरुकुले मयाऽऽचार्य–बृहस्पतेरन्तेवासित्वे शास्त्राणामध्ययनं कृतम्, परमधुना भवतां सन्निधौ काव्यशिक्षां ग्रहीतुमिच्छामि, येन कविर्भूत्वा पत्नीं प्राप्तुं शक्नुयाम्। कृपया कवित्वं शिक्षय गुरुदेव!' इति कालिदासो निवेदयामास।

साधु वत्स! साधु! त्वामहं कवित्वं शिक्षयामि, शृणु कविताम् –

**त्वं तत्काव्यं कुरु हि सततं कविर्भव येन च ,**
**जित्वा वाचा नृपदुहितरं गृहं नय शिष्य! ताम् ।**
**पाणेः रेखा प्रकटयति ते कविर्भवितासि यत् ,**
**तच्छब्दानां रचना–नियमान् विधिं पठ छन्दसाम् ॥**

गुरुवर्य! कतिपयशब्दैर्मनसि रचिता मम कविता श्रूयताम्–

**गुरुदेव! सा विदुषी, यया पति–मानसं न विलोकितम् ,**
**पतिरस्मि सा रमणी हि मे, कथितस्तयाऽस्तु बुधः पतिः ।**
**भविता गुरो! स कविर्महान्, यमसौ पतिं कविमीहते ,**
**तदभीष्टमत्र कविं स्वयं गुरुवर्य! कर्तुमहं यते ॥**

वत्स! तव वाण्यां तु काव्यशक्तिराविर्भवति यत्त्वं मया सार्धं कवितया वार्तामाचरसि। तद् गच्छ, साम्प्रतमेकान्ते स्थित्वा कविताभ्यासं कुरु, येन तवाऽभिलाषेण सह राजकुमारी–कामनाया अपि पूर्तिर्भवेदित्याकर्ण्य कविताभ्यासाय कालिदासस्तत एकान्तं जगाम।

www.thearyasamaj.org

(७)

पुत्रि! श्रूयते यदधुना स कालिदासो गुरुकुलादधीतो विद्वान् संवृतः। तेन शास्त्रार्थे बहवो विद्वांसोऽपि जिताः। अधुना सादरं तमाहूय पतिमङ्गीकुरु, इति पितृवचनमाकर्ण्य स विद्वान् भूत्वा प्रश्नोत्तर-दानाय मम पार्श्वमागत आसीत्, परं मां न जितवानिति पुत्रीकथनं श्रुत्वा 'स उत्तरदाने समर्थ आसीत्, परं त्वया प्रश्नोत्तरं काव्यात्मकम् अभिलषितमिति मातृवचो निशम्य भवत्या कथमित्थं ज्ञातं मातरिति पृष्टे 'तव सख्याः सुशीलायाः सकाशात्। अधुना कवितापणस्तत्र नियोजितः कथं वत्से ? किं त्वमधुनापि तं मनसा नाभिलषसीति' कथिते 'नैव मातः! अहं तं कविं चिकीर्षामि।' श्रूयते-त्रिभिर्वर्षैरितस्ततो भारत-भ्रमणेन बहुज्ञानं लब्ध्वा सोऽधुना कवितामपि करोतीति विद्योत्तमोक्त श्रुत्वा काशिराज उवाच-

यदि तं चिकीर्षसि कविमत्र बाले !,
शक्नोषि कर्तुं तं वासयित्वा ।
अधुना तमङ्गीकुर्याः पतिं, मे
चिन्तां स्वजीवन-दुःखं च दूरय ॥

विद्योत्तमा-

प्रश्नोत्तरे मे काव्यं स कृत्वा ,
स्वयमेकदाऽऽगन्ता मामवश्यम् ।
तदा विचारोऽयं सार्थकः स्यात् ,
पितस्त्वया चिन्ता नो विधेया ॥

पत्नी स्वपतिं प्रति नम्रा स्यादित्युक्त्वा ततो राजा राज्ञी च तौ जग्मतुः।

(८)

कालिदास! किं गुनगुनायसे ? किं कवितां करोषि ? त्वया ह्यः कानिचिद् ऋतुविषयक-पद्यानि श्रावितानि, तेषां सङ्कलनं कृतं न वा ? इति पृष्टे, कृतं भद्र! **ऋतुसंहार** इति नाम सङ्कलनस्य कृतं मित्र! इत्युत्तरिते, कश्चिद् विद्यार्थी तस्य काव्यं प्रशशंस।

साधु मित्र! कविरसि, ते काव्यम्,
चित्तहरं मन्ये मनोहरम् ।
राजसुता साऽधुना त्वां पतिम्,
अङ्गीकरिष्यतीति निश्चितम् ॥

कथय मित्र! किं पुनर्निभर्त्सितोऽसि तया राजकुमार्या ? यामधुनापि त्वं पत्नीं मन्यसे। मया श्रुतं मित्र! पूर्वन्तु सा त्वां विद्वांसमिच्छति स्म, परमधुना सा त्वां कविं कामयते। सा राजकुमारी वर्तते, कमपि राजकुमारं कामयते। यदि त्वादृशे मुण्डित-शिरसि जने तदभिलाषोऽभविष्यत्, तर्हि तस्यां निशि सा त्वां स्वकक्षात् कथं निरसारयिष्यत् ? इति पृष्टः कालिदासो जगाद-

तदा हि कामशास्त्रज्ञो नासं मित्र! युवाप्यहम् ।
योऽभूवमात्मसात्कर्तुं कामोन्मत्तां न तां प्रभुः ॥

किं कवयसि मित्र! पत्नीं प्राप्तुं तुक-बन्धनं करोषि ? इति पृष्टे साम्प्रतमहं **मेघदूतं** नाम काव्यं लिखामि, यस्मिन्नेको विरही पतिः स्वपत्नी-समीपे मेघेन स्वविरह-सन्देशं प्रेषयेतीति कालिदासोक्तम् आकर्ण्य काव्यं दृष्ट्वा कश्चित् कथयति यदस्मिन् काव्ये त्वया स्वविरह एव विरच्यते-

तव जीवने न तस्या भोगः,
येन द्वयोरधुनाऽपि वियोगः।
काव्येऽस्मिन् स रसः सञ्चरति,
येन साऽपि सरसा भविष्यति ॥

www.thearyasamaj.org

अन्योऽपि-

अधुनाऽस्मिन् शारदा प्रसन्ना ,
या कवित्वमस्मै प्रददाति ।
येन कतिपयैरहोभिरेष्यति ,
विद्योत्तमा पार्श्वमेतस्य ॥

शृणुत मित्राणि! शृणुत, यदाऽयं कालिदास उज्जयिनीगुरुकुलादधीत- शास्त्रोऽपि राजकुमारी-सन्निधिमुपगतस्तदापि सा पतिरूपेण सम्मानमस्य नाऽकरोत्। अधुनाऽयं तृतीयवारं तत्र गत्वा स्वकाव्यानि गायं गायं तामनुनेष्यतीत्याकर्ण्य कालिदासोऽब्रवीत्-

शृणु नाहं तामनुनेष्यामि,
पूरयितुं तत्प्रणं यतिष्ये।

परः -

पूर्णे प्रणे मित्र! सा सेवां
करिष्यते तव समयोऽयं ते ?

'किं भवद्भिर्न ज्ञातं यदयं राजकुमारी-प्रश्न-विषये काव्यत्रयं रचयितुं यतते' इति प्रश्न-जिज्ञासायाम् '**अस्ति कश्चिद् वागर्थः**' इति विज्ञापिते कश्चित् काव्यं प्रशंसति-

यदाऽस्य मित्र! काव्यधारेयं ,
प्रवाहमेष्यति तदा द्रक्ष्यथ ।
यत्र महाकवयो मङ्क्ष्यन्ति ,
क्व सा वराकी राजकुमारी ॥
काव्यं त्वं कुरुषे हि यादृशम्,
आशासे त्वं महाकविः स्याः।
तत्कवितां प्रतिदिनमभ्यस्ये-
र्येन शक्नुयाः कर्तुं काव्यम् ?

इत्थं प्रशंसां शृण्वन्नुत्साहितः कालिदासः काव्यानि कर्तुमारेभे।

(९)

राजकुमारि! अधुना तु भवत्याः पतिः कविरपि संवृत्त इति श्रूयते। तस्य काव्यानि जनता समनोयोगं शृणोति। इतो गतस्य तस्य द्वे वर्षे गते। तत्रोज्जयिन्यां राज्ञा वीरविक्रमादित्येन स राजकविपदे नियुक्तः। तत्र राजकीयसुखसुविधामधिगम्य स त्वामपि व्यस्मरत्। किं त्वमपि तं न स्मरसि ? पतिं विना नारी-जीवनं व्यर्थम्। शृणु सखि!

पत्या सह जीवने तु नारी ,
यमानन्दमनुभवति लौकिकम् ।
तमिन्द्रियैर्जनितं मनीषिणः ,
परमानन्दमेव निगदन्ति ?
आत्मा परमात्मनं न यावद् ,
गच्छति तावल्लोकं भ्रमति ।
तथैव नारी नरं न लज्जा ,
यौवनविषमवनानि गच्छति ॥

'राजपुत्रि! यस्याः नार्याः जीवने पतिसुखं नास्ति, तत्तस्यास्तानि सर्वसुखसाधनानि निरर्थकानि भवन्ति। अतस्त्वं पतिं प्राप्य जीवनानन्दं लभस्व।' इत्याकर्ण्य विद्योत्तमा सखीं प्रोवाच-

तव विचारमाद्रिये सुशीले ,
वचोऽनुरूपं ह्यागन्ता सः।
यदि स परीक्षा-सफलः स्यात्तत् ,
पतिरूपेण तमङ्गीकुर्याम् ॥

www.thearyasamaj.org

राजकुमारि! भवतीं सम्मेलितुमीहते कविकालिदासो द्वारि तिष्ठतीति सेविकयोक्ते सादरं प्रवेशय तमिति राजसुतोक्तमाकार्ण्य री सखि! साम्प्रतमहं गच्छामि, त्वं तावत् स्वपतिं सम्मानय। एकान्ते प्रेमालापमाचर। मधुरालापेन तमात्मीयं कुरु। जगन्नियन्ता परमेशस्त्वामग्रेसारयतु स्वपतिं वशीकर्तुमित्युक्त्वा गतायां सख्याम्, आगम्यताम्, आगम्यतां कविवर! समलंक्रियतामयं पर्यङ्क इति विद्योत्तमया कथिते नाऽहं योग्यस्तो पर्यङ्काऽऽरोहणस्य। अत्राऽऽसन्द्यामुपविशामि। श्रूयतां स्वप्रश्नोत्तरं राजपुत्रि! भवत्या: प्रश्न आसीत्- **'अस्ति कश्चिद् वागर्थ'** इति।

भवदीयप्रश्नोत्तरविषयकं काव्य-त्रयं प्रणीतं मया, यद् भवत्प्रश्नवाक्यपदाग्रमस्ति, तत्क्रमश: श्रोतव्यम्। तत्रैतत् प्रथममस्ति **कुमारसम्भवं** नाम महाकाव्यम्। यत्र मया त्वं पार्वती-स्वरूपा तापसी चित्रिता, या स्वकष्टकरैस्तपोभिरिष्टं शिवमवाप्तुं समर्था बभूव। अस्य काव्यस्याऽयमादिम: श्लोक:-

**अस्त्युत्तरस्यां दिशि देवतात्मा,**
**हिमालयो नाम नगाधिराज: ।**
**पूर्वाऽपरौ तोयनिधी वगाह्य,**
**स्थित: पृथिव्या इव मानदण्ड: ॥**

गृह्यतां काव्यमेतदित्युक्त्वा कालिदासस्तस्यै तत्समर्पयामास।

विद्योत्तमा-

सुन्दरं सुन्दरं काव्यमेतत् कविवर!

कालिदास: -

**द्वितीयं मेघदूतकाव्यं मे,**
**यस्मिंस्त्वं यक्षिणी चित्रिता।**
**कश्चिद् यक्षो यस्या: विरहे,**
**व्याकुलोऽस्त्यहमस्मि यथा ते ॥**

यस्या: पद्यमेतत्-

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्त:,**
**शापेनाऽस्तङ्गमितमहिमा वर्षभोग्येण भर्तु: ।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु,**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥**

गृह्यतामेतदिति कथयित्वा तदपि तस्यै समर्पयत्।

विद्योत्तमा-

एतत्काव्यन्तु भवदीयमतीवमनोहरं चित्ताकर्षकं च। तृतीयं काव्यं कीदृशमस्ति तदपि श्राव्यताम्।

कालिदास: -

**तृतीयं मे रघुवंशं काव्यं,**
**दाम्पत्यं प्रकटितं तत्र तत् ।**
**वागर्थौ मिलत: परस्परं,**
**यथा तथा पतिपत्नीमेल: ॥**

यस्याऽऽरम्भोऽस्मादाद्यश्लोकाद् भवति-
**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।**
**जगत: पितरौ वन्दे पार्वती-परमेश्वरौ ॥**
गृह्यतामेतदपि।

विद्योत्तमा-

कविवर! काव्येऽस्मिन् भवता पतिपत्नीमेलोपमा वागर्थ-मेलेन सह कृता, याऽतीव प्रशंसनीया वर्तते।

कालिदास:-

काव्यत्रयी दृश्यतां यस्याम्, प्रश्नस्योत्तरमस्ति भवत्या:। इहास्ति कश्चिद् वागर्थो य इष्टस्त्वया तं हि कथयस्व।

विद्योत्तमा- प्रियतम!

**प्राप्तो मयाऽत्र तव वागर्थ:,**
**कविरसि विद्वानसि छन्दोज्ञ: ।**
**त्वामहमैच्छं यादृशं कविम्,**
**तादृशोऽसि, पतिमधुना मन्ये ॥**

कालिदास:

**सांसारिकं कर्म यद् भवति,**
**तयोर्द्वयोर्योगेन प्रिये! तत् ।**
**वाण्यामर्थो यथा विभाति,**
**पत्न्यां पतियोगस्तथेष्यते ॥**

www.thearyasamaj.org

पत्नीयोगोऽपि तादृशः स्याद्,
येन विना पत्युर्विह्वलता।
यथा ह्यजे रामे वा दृष्टा,
तथा ममाऽपि स्थितिस्त्वां विना॥

**विद्योत्तमा**– प्रियतम!

अग्रे सर, मम करं गृहाण,
पाणिग्रहणमद्य मे भविता।
तदेहि पर्यङ्कं प्रिय! पूरय,
मम कामं मम तृषं च शमय॥

**कालिदासः** –

शृणु मम हृदये सा गुरुश्रद्धा,
या नमयति मां भवदग्रे हि।
भर्त्सनया तेऽहं कविः कृतः,
तत्त्वां पत्नीं नाऽङ्गीकुर्वे॥

**विद्योत्तमा**–

प्रियतम! निरन्तरमद्यतनदिवसात् पूर्वमहं भवता पत्नी मताऽस्मि। येन भवता स्वकाव्येषु पत्नीं प्रति या सादरप्रेमभावना व्यक्ता, तस्याः किमधिकारिणी नाऽहम्?

प्रिय! तव पत्नी प्रेम–पिपासुः,
या पतिप्रेमाऽभिलषति नित्यम्।
प्रसादयसि मे प्रत्यङ्गं त्वम्,
यत्राऽनङ्गसमं त्वां प्रेक्षे॥
एहि प्रियतम! मम पर्यङ्कं,
मनसश्च मे पिपासां शमय।
प्रेमवचनमवलम्बय शीघ्रं
चुम्ब कपोलौ मामालिङ्ग॥

**कालिदासः** –

नहि, नहि विज्ञे! तदनर्थं कर्तुं मां न प्रेरय। त्वया तु मां प्रति तत्कार्यं सम्पादितं यद् गुरुरेकः शिष्यं प्रति करोति। अतो मे हृदये भवतीं प्रति गुरुश्रद्धा वर्तते, तस्मादहं भवतीं पत्नीं नाङ्गीकुर्वे, परं श्रद्धया त्वां गुरुं मन्ये। तदनुसारेण स्वकाव्यकुसुमानि मया भवत्यै सादरं सश्रद्धं च समर्पितानि।

अतो मदीये हृदये भद्रे!,
यत् स्थानं निर्मितं भवत्या।
तत्पदमुच्चं पूज्यगुरोरिह
कृपया स्वीकुरु विद्ये देवि!॥

**विद्योत्तमा**–

पूज्य पतिदेव! नाऽहं गुरुपदम् अभिलषामि। तव चरणसेवामधुना चिकीर्षामि। या पत्नी साध्वी भवति, सा पतिहितं विदधाति। मया पतिं प्रति तत्कार्यं कृतम्, यदेका हितकारिणी पत्नी करोति। अहं त्वां विद्वांसं कर्तुमैच्छम्। अतो मया तव भर्त्सना कृता। अद्य मे भर्त्सनया कविरसि विद्वन्! यदि पत्नी स्वमूर्खपतिं विद्वांसं कर्तुं भर्त्सयति, तत्किं तस्याः पतिर्बुधो भूत्वा स्वपत्नीं गुरुं मत्वा दाम्पत्यं जहाति? नहि, तौ द्वावपि प्रेममार्गमनुसरत एव।

अतो भवान् हृदयेन मां गुरुं,
मनसा पत्नीमङ्गीकुरुताम्।
येनाऽऽवयोर्जीवनं गच्छेत्,
पतिपत्नीप्रणयानन्द प्रिय!॥

**कालिदासः** –

प्रेममार्गमनुसरामि विज्ञे
केवलमन्तरमत्रैतावत्।
आसीः पुरा प्रिया, गुरुरद्य,
तत्प्रणयं त्वयि कथन्न कुर्याम्?॥

नाऽहं ते पतिः, नाऽहं ते पति., त्वं मे गुरुरिति वदन् कालिदासस्ततो जगाम। प्रिय! क्व यासि? प्रियतम! क्व यासि? अहं पत्नी तवाऽस्मि। मत्तो दूरं मा गाः, मत्तो दूरं मा गाः। अधुनापि किमनधीतकामशास्त्रोऽसि? कुत्र गच्छसीत्थं चीत्कुर्वती सा कक्षान्निर्गता विद्योत्तमा कालिदासं पलायितं दृष्ट्वा पुनः कक्षं प्रविश्य रुरोद।

[ **क्रमशः** ]

www.thearyasamaj.org

# ❋ संस्कृत-भाषायां स्वराष्ट्र-चिन्तनम् ❋

-डॉ. महावीर अग्रवाल:
कुलपति:, उत्तराखण्ड-संस्कृत-विश्वविद्यालय:
हरिद्वारम् ( उत्तराखण्डम् )

सर्वासां किल भाषाणां जननी-रूपा प्राणभूता च संस्कृत-भाषा। वैदिककालादारभ्य वर्तमानकालपर्यन्तं संस्कृत-भागीरथी सततं प्रवहमाना समेषां चेतांसि चमत्करोति। अस्यां हि देव-भाषायां किं नास्ति? ज्ञान-विज्ञानस्य न विद्यते तादृशं किमप्यङ्गं यन्नोपलभ्येत संस्कृत-भाषायाम्।

मानव-जीवने राष्ट्रीयताया: स्वतन्त्रतायाश्च भावना श्रेष्ठतमा सर्वासां भावनानाम्। अनयैव सुभावनया प्रेरिता: देशभक्ता: स्वसर्वस्वं राष्ट्राध्वरे जुह्वति। अस्मद्देशीयै: देशप्रेमपरिपूरितान्त:करणै: वीरवरै: राष्ट्ररक्षार्थं, स्वतन्त्रता-प्राप्त्यर्थं च किं किं न सोढम्। अस्या: देशभक्ते: प्रेरणा-भूतं संस्कृत-साहित्यमद्यापि निखिलान् जनान् प्रेरयति।

वैदिकवाङ्मये स्वराष्ट्रचिन्तनं विशदतया द्रष्टुं शक्यते। अथर्ववेदभूमिसूक्ते- **'माता भूमि: पुत्रोऽहं पृथिव्या:'** तथा च **'वयं तुभ्यं बलिहृत: स्याम'**, ऋग्वेदे च- **'अर्चन्ननु स्वराज्यम्'** इत्यादि सुवचनै: राष्ट्रदेवो बहुशो वन्दित:।

रामायणे, महाभारते, कालिदास-साहित्ये च राष्ट्रदीप: सततं प्रदीप्तो वर्तते। पराधीन-भारते एकोनविंशशताब्द्या: अन्तिमे भागे, विंशशताब्द्या: प्रारम्भे लोकमान्यतिलक, अप्पाशास्त्री, कवीन्द्र श्रीधर पाठक, लिंगेश शर्मा, विद्याभूषण, एम.के. ताताचार्य, टी. गणपतिशास्त्री, यादवेश्वर, तर्कयत्न:, पं. ताराचरण-भट्टाचार्य-प्रभृतयोऽनेके कवीश्वरा: संस्कृत-चन्द्रिका सूनृत-वादिनी इत्यादिषु संस्कृत-पत्रिकासु देशभक्ते: ज्वालां ज्वालयामासु:। एते संस्कृतज्ञा: आङ्ग्ल-शासकै: बहुधा कारागारेषु निक्षिप्ता:, परं **'न्याय्यात् पथं प्रविचलन्ति पदं न धीरा:।'** इति वचनमनुरुध्य राष्ट्र-जागरणस्य कार्यं न तत्यजु:।

अर्वाचीनं संस्कृत-साहित्यमपि अनया चेतनया परिपूर्णमस्ति। प्राणरूपा खलु देवभाषा संस्कृत-भाषा देशस्यास्य। किं नास्ति संस्कृते, संस्कृतं पठित्वैव **'इदं राष्ट्राय, इदं न मम'** इति व्याहरन्त: भारतीया: स्वाधीनता-देव्या: पूजायां सर्वस्वं समर्पयन्ति। स्वराज्यस्य मन्त्रदाता लोकमान्यस्तिलक: संस्कृतस्याप्रतिमो विद्वान् बभूव। वीर: सावरकरोऽपि संस्कृतकाननविहरणशील आसीत्। पराधीने भारते स्वतन्त्रता-भावं जने-जने उद्भावयितुं संस्कृत-कवय: स्वरचना-कौशलेन प्रयत्नानां पराकाष्ठामकार्षु:। ते कवीन्द्रा: भारतस्य गौरवं गायं गायं लक्ष्यमिदं

www.thearyasamaj.org

प्राप्तवन्तः। महाकविः द्विजेन्द्रनाथः **'स्वराज्यविजय'**-महाकाव्ये कश्मीरस्य महिमानं, सौन्दर्यं च कया शैल्या वर्णयति-

**अस्ति स्वस्तिसमा समस्तसुषमाऽलंकारभूता भुवः,**
**या साक्षात् सुषमैव विग्रहवती संसारसारोपमा ।**
**यत्रात्तुङ्गतरङ्गकोमलरवा कल्लोल-लीलाकुलः,**
**स्वच्छन्दाः परितो वहन्ति विततास्ते निर्मला निर्झराः॥**

राष्ट्रभावनानामाह्वानं कुर्वन् कविवरेण्यः गायति-

**प्रियाः देशभक्ताः मम भारतीयाः,**
**इदं स्मृतेः पत्रमपि स्वचित्ते ।**
**विधाय नित्यं प्रियमातृभूमेः,**
**नमत् प्रणामानुररी कुरुध्वम् ॥**

संस्कृत-भाषा तथा स्वातन्त्र्य-भावनोपेता वर्त्तते, यथा संस्कृतज्ञः संस्कृतानुरागी वा न क्षणमपि पारतन्त्रे स्थातुमर्हति। पराधीन-भारते संस्कृत-विद्वांसः नव-नव ग्रन्थ-रचनया संस्कृत-पत्रिका-माध्यमेन च स्वातन्त्र्य-दीपमनवरतं ज्वालयाम्बभुवुः। तंजार-वास्तव्यः रामस्वामी-राजू महाकाव्यशैल्या आङ्ग्लानां भारते आगमनतो प्रारभ्य ईश्वरचन्द्र विद्यासागरं यावत् ऐतिह्यं **'राजाङ्ग महोदयः'** संस्कृते विलिलेख।

तदनन्तरं च सदाशिव मोरेश्वर भिडे महोदयाः शिववीरतः प्रारभ्य बाजीराव द्वितीयपर्यन्तं ऐतिह्यं इतिहासोपदेशकं लिखितवन्तः। युगीन-विद्योदय-संस्कृतचन्द्रिकेति संस्कृत-पत्रिकयोः इतिहास-विषयकाः निबन्धाः बाहुल्येन वर्तन्ते स्म। जून १९०० विद्योदय-पत्रिकायां प्रकाशिते निबन्धे मध्ययुगीन-राजसी-संस्कृतिः भृशमाक्षिप्ता वर्तते, तत्रैव च आङ्ग्ल-साम्राज्यविरोधे एकस्य नूतनयुगस्याह्वानं, क्रान्ति-युतं चैतन्यं चापि वर्तते-

'अद्य पञ्चाशतानि वर्षाणि यावत् कठोरयवनभारततन्त्रामनुभवतां तेषां भारतीयानां, आत्मानुरागः समूलच्छेदमापन्नः पापप्रवृत्तिश्च क्रमेण सुदृढबद्धमूला वृद्धिमुपगता। पूर्वं बलात्कारेण प्रजानां पूर्वधर्मसमुच्छेदोद्यतानां निर्दय-यवन-भूपतीनामत्युच्छृङ्खलशासनसमयेऽपि प्रजासु यावती धर्म-प्रवृत्तिरवशिष्टा आसीत्, इदानीं प्रजाधर्म-रक्षणधृतव्रता सुसभ्यराजकुलस्य न्यायानुमतशासन-स्थितानामपि प्रजानां प्रतिदिनं प्रतिक्षणं धर्ममुपगन्तुं निर्मूलमेव सञ्जातम्। यवनाधिकार-समये बलात् यवनीकृता अपि जनाः अन्तः स्वधर्मानुरागं धारयन्ति स्म, साम्प्रतन्तु बहिः स्वधर्मानुरागप्रदर्शयन्त्योऽपि मूढं धर्मविगर्हितमाचरन्ति।'

अम्बिकादत्तव्यासविरचिते **'शिवराजविजय'**-नाम्नि औपन्यासिक-गद्यकाव्ये भावनेयं सुतरां जागर्ति। अधोलिखिते गद्यखण्डे वर्णिता भारतवर्षस्य हिन्दूप्रजातेश्च दुर्दशा कस्य चेतसि क्षोभं न जनयति-

'वीर विक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश शतकानि व्यतीतानि। क्वाधुना मन्दिरे-मन्दिरे जयध्वनिः? क्व च संप्रति तीर्थे-तीर्थे घण्टानादः? क्वाद्यापि मठे-मठे वेदघोषः। अद्य

www.thearyasamaj.org

हि वेदाः विच्छिद्य वीथिषु विक्षिप्यन्ते, पुराणानि नष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते, क्वचित् तुलसी-वनानि छिद्यन्तेः.......।'

कवीन्द्रस्य श्रीधरपाठकस्य गीतेषु भारतमातुः वन्दना स्पन्दते। वन्दनेयं जयदेवस्य गीतगोविन्दस्य बंकिमस्य च **'वन्दे मातरम्'** गीतस्य गरिमां बिभर्ति-

**वन्दे भारत-देशमुदारम्,**
**सुप्ता सदन-सकल-सुख-सारम् ।**
**भाल-विशाल-हिमाचल-भ्राजम्,**
**चरण-विराजित-अर्णवराजम् ॥**
**तप-धृत-सहस्र-कोटि-करवालम्,**
**दुःसह-दुराप-प्रताप-विशालम् ॥**

पराधीन-भारते यथा हिन्दी, बंगला, मराठी-प्रभृति-भारतीय-भाषासु दैनिक-मासिक-पत्र-पत्रिकासु प्रकाशिताः देश-भक्ति-परिपूर्णाः लेखाः स्वातन्त्र्योद्घोषं कृतवन्तः, तथैव सुरभारती-समुपासन-रतैः लेखकैरपि स्वातन्त्र्यदेवी समर्चिताः संस्कृत-विद्वांसश्च समाहूता आङ्ग्ल-शासकानां विरोधाय। **'संस्कृत-चन्द्रिकायां'** मान्याः अप्पाशास्त्रिणः प्राहुः -

'संस्कृत-पण्डिता अपीदानीं सुदूरमुज्झित्वाऽऽलस्यमवश्यमेव कर्मणि प्रवर्तेरन् गोचरीकारयेयुश्चापरेषामात्मनः स्वदेश-प्रणयातिशयमिति प्रार्थयामहे।'

-संस्कृतचन्द्रिका, सितम्बर १९०५ पृ. ७७४

एतासु पत्रिकासु क्रान्तिवीराणां वृत्तानि प्रामुख्येन प्रकाश्यन्ते स्म। क्रान्तिवीरे **खुदीराम बोसे** मृत्युदण्डं प्रापिते संस्कृत-पत्राणि शोक-निमग्नानि बभूवुः। सूनृतवादिण्याः सम्पादकः अप्पाशास्त्री क्रान्तिवीरायास्मै श्रद्धाञ्जलिं समर्पयन् अलिखत्-

**घटिकार्धमात्रेण च प्रायासिषुरमुष्य प्राणाः ।**
**प्रेतस्य चामुष्य मुखं स्मयमानमिवासीत् ॥**

-सूनृतवादिनी, खण्ड २, संख्या २३

वृत्तमिदं येषु पत्रेषु प्रकाशितं तेषां दमनाय, राष्ट्रिय-मुक्तिसंग्रामे च प्रहर्तुं औपनिवेशिकाधिकारिणः **लोकमान्यतिलकं** कारागृहे निचिक्षिपुः केसरी-पत्रे च राजद्रोहाभियोगो योजितः। तदा सूनृत-वादिन्यां स्थूल-स्थूलेषु कृष्णाक्षरेषु पृष्ठत्रये कष्टदमिदमुदन्तं **'धिक् कष्टम्! दण्डितो महात्मा तिलकः।'** इति शीर्षकेन प्रकाशितम्। राष्ट्रभक्त-कविः अप्पाशास्त्री घटनयातितरां व्यथितो बभूव। **'तिलकमहाशयस्य कारागृहनिवासः'** नामक-कवितायां च स्व-मनोव्यथां प्रदर्शयामास।

शास्त्रीवर्यः तिलक-कर-पतितं निगडमपि दूषण-स्थाने भूषणममन्यत-

**निगदन्तु निसर्गदुर्धियो,**
**निगडं दूषणमित्यमुं तव ।**
**अपरं स तथापि भूषणं,**
**भवतो येन विशिष्य पूज्यते ॥**

इमे अप्पाशास्त्रिणः **खुदीराम बोस तिलकवर्यं** चाधिकृत्य काव्यनिर्माणकारणात् आङ्ग्लशासकैः

www.thearyasamaj.org

कारागारे निक्षिप्ताः। आङ्ग्ल-शासन-विरोधे विचाराभिव्यक्तिकारणात् बंगदेशीयाः पंचाननतर्करत्नमहाशया अपि बन्दीगृहे निपातिताः। एवंविधे विषमे समये **अप्पाशास्त्रिवर्यः** सुनृतवादिन्या वंगीयान् यूनः युवत्यः वीरभार्याः मातरश्च पुनरुद्बोधयितुमित्थं सन्दिष्टवान्-

'अयि जागृत वङ्गीयकुमार्य्य! जागृत। मा तावत् समर्प्यतामात्मा निद्रायै। अयि राष्ट्रभावनाम् आह्वानं कुर्वन् कविवरेण्य गायति -

भामिन्यः! परित्यज्यतां स्वापः। प्रबुध्यध्वं समाकर्णित-तूर्यध्वनयश्च, समागच्छत सम्भूयैकत्र। अयि वीरपत्न्यो वीरमातरश्च। निराक्रियन्तां तावदमी प्रगाढश्यामलः जलदाः, प्यायन्तां स्तनन्धयास्तन्यम्। सुदूरमुत्सार्य व्रीडा सह विलासेन सह च प्रणयेन प्रस्तूयतां मधुरमधुरस्यात्मनः स्तन्यस्य समर्पणेन स्वदेशाभिमानं शिशूनाम्।'

## १. स्वदेशी-भावना आत्मावलम्बनं च -

अप्पाशास्त्री, लिंगेश शर्मा, विद्याभूषण, एम.के. ताताचार्यादीनां संस्कृतज्ञानां त्वे तेषां हृदयेषु स्थितस्य आत्मनिर्भरराष्ट्रस्य कल्पना अभिव्यज्यते। राष्ट्रियकांग्रेस-पक्षेण यत् स्वदेशी-आन्दोलनं प्रेरितं तत् बंगभङ्गतोऽपि पूर्वम् अप्पाशास्त्रीमहोदयैः स्वलेखन्या प्रवर्तितमासीत्। **'आत्मावलम्बनम्'** नामकस्तेषां लेखः संस्कृत-चन्द्रिकायां प्रकाशितोऽभवत्, यस्मिन् आर्थिकस्वतन्त्रतायाः स्पष्टोद्घोष आसीत्।

यथा-

'धिक् कष्टम्। परिपाको भारतीयानां दुर्भाग्यधेयस्य। सहृदयाः केनापि भागधेयहतकस्य विलसितेन नियन्त्रिता इदानीं सर्वेऽपि भारतीयाः वयं परान्नैवालवलम्बमानाः सुखसागर इव निमग्नमात्मानमाकलयामः मनागप्यनुध्यायतां चेतसि कीदृशा इदानीं वयं संवृत्ता, कीदृशी च प्रवृत्तिरस्माकं, कुत्रेदानीमासक्तिः, किमिदानीं शरणं, कथं चैतदेवं संवृत्तमिति।'

कोऽयं निरभिमानः, किमिदमालस्यं, केयं परावलम्बता? किमिदं दैन्यम्? किमिदं कर्तव्यपराङ्मुखत्वम्? न जानीमः कथमेतत् सहन्ते भवन्त इति।

## २. दुर्दशा-वर्णनम् -

तद्युगीनाः कवयः लेखकाश्च जनानां ध्यानं देशस्य हीनावस्थां, दुर्दशां, पतनं प्रति च समाकृष्य तेषां चेतस्सु पीडां स्वाभिमानं च जनयितुं प्रायतन्त। अयमपि राष्ट्रियतायाः स्वतन्त्रता-प्राप्तेश्च पन्था आसीत्, येन राष्ट्रवासिनः उद्विग्नाः भूत्वा आङ्ग्ल-शासनं विनाशयितुं दृढ-प्रतिज्ञा अभवन्।

शिक्षायाः संस्कृतेश्चाघातं सहमानाः आर्थिक-दुर्दशया च प्रभाविता तत्कालीनी सामाजिकी दशा किमपि नूतनं कान्तिकारीरूपं दाधार। टी. गणपति शास्त्री-महोदयाः कवितायाः तत्कालीनं भय-प्रदं स्वरूपं स्पष्ट-रूपेण वर्णयामासुः -

www.thearyasamaj.org

(१)

दुर्भिक्ष-दावानल-तीव्र-वेगः,
शिखा ज्वलन्ती सततं प्रदग्धम्।
अस्मादृशान्नूनमहो प्रवृत्ताः,
हरे! क्व गच्छामि ननु क्व शान्तिः।।

(२)

अनावृतं गात्रमिदं हिमेन,
प्रकम्पते शुष्यति देश एषः।
पथ्यं न किञ्चित् परिचीयतेऽत्र,
हरे! क्व गच्छामि ननु क्व शान्तिः।।

(३)

आच्छादनं नैकमपीह हाहा,
छिन्नां शुकैरावरयन्ती गात्रम्।
प्रिया बुभुक्षास्तु हरन्ति शान्तिं,
हरे! क्व गच्छामि ननु क्व शान्तिः।।

३. संस्कृत-प्रेम –

राष्ट्रियतायाः विभिन्नेष्वङ्गेषु स्वदेशभाषाया अपि महत्त्वपूर्णं स्थानं वरीवर्ति। मातृभूमिवत् मातृ-भाषायाः प्रेम देश-भक्तानां हृदयेषु श्रद्धातिरेकं सञ्चारयति। ये आङ्ग्लाः भारतीयानां मातृभाषां संस्कृतमवहेलयन्ति स्म तान् प्रति संस्कृतज्ञानां चेतस्सु महान् कोपः जज्वाल। कवीन्द्रः **महेशचन्द्रचूडामणिः** स्वं कोपमेवं प्रकाशितवान्–

**ये तु केचिदिमां दिव्यां भारतीममृतामपि।**
**मृतां वदन्तो निन्दन्ति दूरात् परिहरन्ति च।।**
**मूढास्ते पण्डितम्मन्या बालास्ते वृद्धमानिनः।**
**अन्धास्ते दृष्टिमन्तोऽपि प्राप्ता गजनिमीलिकाम्।।**

–दिनाजपुरराजवंशीयं महाकाव्यम्, सर्ग २

तद् युगीनाः कवीश्वराः स्वदेशीवस्तूनीव देशे स्वदेशी-भाषां प्रतिष्ठापयितुं प्रयत्नानां पराकाष्ठामकार्षुः। तदानीं संस्कृतमन्तरा नासीत् अन्या काचिद् भाषा यस्याः राष्ट्रव्यापी प्रचारो भवेत्। अस्मिन् युगे दिशि-दिशि स्वतन्त्रता-भाव-भरितैः संस्कृतज्ञैः संस्कृतस्य विजयोद्घोषोऽकारि। तदानीन्तनाः साहित्यकाराः यस्मिन् विषमे काले साहित्यं समाजं च सिषेविरे, सा कथा निरुत्साहान्, बलहीनान्, साहित्यकारान् अपि बलं प्रयच्छति, प्रेरयति च। तदानीं भारतस्य कलकत्ता-मुम्बई-त्रिवेन्द्रम्-लाहौर-प्रयागादि-नगरेषु संस्कृत-पत्रिकानां भूयान् प्रचार आसीत्।

एकोनविंशशताब्द्याः अन्ते देशे चत्वारिंशत् संस्कृत-पत्रिकाः प्रकाशयन्ते स्म। तदा संस्कृत-कवयः स्वातन्त्र्य-समरस्य धुरां धारयामासुः। विंश-शताब्द्यां प्रारम्भे संस्कृत-जगति नव-चैतन्यमायातम्। दुर्भिक्ष-पीडितानां बुभुक्षया काल-कवलितानां भारतीयानां विपन्नावस्थां विलोक्य देशभक्ताः क्षोभ-युक्तां वाचं वितेनुः। यथा–

'तादृशमिदानीं हन्त! हन्त! प्रतिपदं निपतति महत्तरे दुर्भिक्षगर्त्त इति एकत्र शाम्यति दुर्भिक्षे पुनरविलम्बमन्यत्र प्रसरति तदिति च तत्तद् वृत्तान्त-पत्रिकान् परमपि तु स्वानुभवोऽप्यस्मान् विश्वासयति किमु वक्तव्यं पत्र-सुहृदाम्।'

–संस्कृतचन्द्रिका, ८ नवम्बर १९०९

X X X X X

www.thearyasamaj.org

अप्पाशास्त्रीवर्याः भारतीयानां जातीय-चेतनायां क्रियमाणमाङ्ग्लानां षड्यन्त्रं निभाल्य तेषां विरोधे जनाह्वानं कुर्वन्तः प्रोचुः-

'संस्कृत - पण्डिताः अपीदानीं सुदूरमुज्झित्वालस्यमवश्यमेव कर्मणि प्रवर्त्तेरन्' गोचरीकारयेयुश्चापरेषामात्मनः स्वदेश-प्रणयातिशयमिति प्रार्थयामहे। -संस्कृतचन्द्रिका, सितम्बर १९६५ पृष्ठ ११४

बंगभंगान्दोलने संस्कृत-पण्डितेषु यादवेश्वर-तर्करत्नाः पं. ताराचरणभट्टाचार्यश्च अग्रणी-भूमिकायामवर्तन्त। यादवेश्वरैः बंगभंगविरोधे मानद-दण्डाधिकारी पदमपि त्यक्तम्। ते **'अश्रु-विसर्जनम्'** काव्ये बंगभंगमधिकृत्य शोकोद्वेगं प्रकटयामासुः। अन्यस्मिन् **'भारत-माता'** इति काव्ये देशस्यास्य गौरवयुतमतीतं द्रष्टुं शक्यते।

एवं पराधीनता-काले संस्कृत-सेवा-परायणाः विद्वांसः प्राणानपि अविगणय्य राष्ट्र-जागरणस्य महनीयं कार्यं कुर्वाणाः, देशभक्तेषु धुरि कीर्त्तनीयाः सर्वेषां भारताभिजनानामभिनन्दनीयाः, वन्दनीयाश्च नात्र संशीति-लेशोऽपि वर्तते।

●

# भारतोदय-प्रकाशन-विवरणम्


भारतोदयस्य स्वामित्वानुबन्धि फरवरी-मासात् परं निर्देष्टव्यं विवरणम्

फार्म-६, नियम-८

| | | | |
|---|---|---|---|
| १. | प्रकाशन-स्थलम् | - | गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| २. | प्रकाशन-समयः | - | मासिकम् |
| ३. | मुद्रकस्य नाम | - | डा. हरिगोपालशास्त्री |
| | राष्ट्रियता | - | भारतीयः |
| | मुद्रणालय-सङ्केतः | - | न्यू जे.एन. स्टेशनरी मार्ट, गुरुद्वारा रोड, ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| ४. | सम्पादकस्य नाम | - | डा. हरिगोपालशास्त्री |
| | राष्ट्रियता | - | भारतीयः |
| | सङ्केतः | - | कुलपतिः, गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) |
| ४. | प्रकाशकस्य नाम | - | डा. हरिगोपालशास्त्री |
| | राष्ट्रियता | - | भारतीयः |
| | सङ्केतः | - | कुलपतिः, गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डः) पत्रालयः- गुरुकुलकाङ्गड़ी-२४९४०४, हरिद्वारम् (उत्तराखण्डः) |

अहं डा. हरिगोपालशास्त्री अनेन घोषयामि, यदुपरि लिखितं सर्वं विवरणं ममाभिज्ञानानुसारं यथावद् वर्तते।

-डा. हरिगोपालशास्त्री

प्रकाशकः सम्पादकश्च

भारतोदयः (संस्कृत-मासिकस्य)

दिनाङ्कः- १.३.२०१६ ई.

www.thearyasamaj.org

## ❋ हिन्दी-गीतस्य संस्कृतेऽनुवादः ❋

[ 'तेरे मेरे मिलन की ये रैना' इत्यस्य ]

-अनुवादकः, डॉ. प्रकाशपन्तः
सहायकाचार्यः शिक्षाशास्त्रविभागे
उत्तराखण्ड-संस्कृत-विश्वविद्यालयः
हरिद्वारम् ( उत्तराखण्डम् )

(१)

तव मम सङ्गमस्य निशा,
नवं जनयिष्यति सुमनं किल ।
अतो नयने तेऽपि चपले.......पश्येमे ॥

(२)

बालो रविरिह उदेश्यति अङ्गणे ,
मन्ये मे करयोऽस्तु नव कङ्कणे ।
यथा खेलति शशी मेघेषु ,
असौ क्रीडिष्यति तवाङ्केषु ।
काकलीं त्वं तदा गास्यसि ,
अतो नयने तेऽपि चपले...पश्येमे ॥

(३)

त्वामालिङ्ग्यानेकबाहुभिः ,
मेलिष्ये मदनस्य रजनीभिः ।
अभिनवं हृदि ते प्रदाय रवम् ,
मनस्तेऽहं भरिष्ये प्रियतम! ।
पीडयिष्यति ललित-लीलाभिः ,
अतो नयने तेऽपि चपले...पश्येमे ॥

●

## ❋ साभिवादनमीश-स्तुतिः ❋

-श्री पं. दिलीपदत्त उपाध्यायः

(१)

प्रभो! मयि धेहि विज्ञानं,
तरेयं दुःखसागरतः ।
त्वदीया प्रेम्णा भक्तिं,
धरेयं शाश्वतं धातः ॥

(२)

विचित्रो निर्मितः कायो ,
द्विधानि चेन्द्रियाणीति ।
यथास्थानं यथाकामं,
त्वमेव तात हे दातः! ॥

(३)

इमानि पञ्च-भूतानि,
पृथिव्यप्तैजसादीनि ।
समानि सर्वतः कृत्वा ,
अहो सृष्टे सरीसर्तः ॥

(४)

विभो! मातः पितः भ्रातः
सकल-संसार-चर्कर्तः ।
त्वमेव मुक्तिदा स्रोतः,
अहो आनन्ददाता नः ॥

(५)

त्वदीयं शरणमापन्नो,
मदीयं छिन्धि अघ-ग्रन्थिम् ।
भरेयं भावनां शुद्धां,
जयेयं मानसं ज्ञातः ॥

●

www.thearyasamaj.org



# ❋ राष्ट्रोन्नयनं सर्वैः करणीयम् ❋

-डॉ. रणजीत झा
बोकारो ( झारखण्डम् )

(१)

वीरशोणितसिञ्चिता भूमिरियम् ,
धीरधीर्धारिता हि धरणीयम् ।
कविकोकिलकूजित-पृथिवीयम् ,
राष्ट्रोन्नयनं सर्वैः करणीयम् ॥

(२)

शक-यवन -हूण -म्लेच्छ-मृगैः सह,
सिंह-रूपाः प्रवीरा अमरत्वङ्गताः।
सैनिकानां त्यागम् अद्य स्मरणीयम्,
राष्ट्रोन्नयनं सर्वैः करणीयम् ॥

(३)

पूज्यते गेहे गेहे या देवीव ,
हन्यते उदरे -उदरे सा कर्कटेव।
सन्ततिर्सन्तानासम्भवस्मरणीयम् ,
राष्ट्रोन्नयनं सर्वैः करणीयम् ॥

(४)

दावानल-क्षेत्रवादेन वै ,
वर्गवादेन भाषा-पन्थ-वादेन वै।
भारतैक्यमनेन कथं विचारणीयं ,
राष्ट्रोन्नयनं सर्वैः करणीयम् ॥

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः ( संस्कृत-मासिकम् )
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् ( उत्तराखण्डम् )
सेवायाम्,
श्री.....

(५)

भ्रष्टभूतेन प्रेरित -प्रायः अधिकारिणः,
विस्मरन्तो हि तेऽद्य सुकृतिनः।
सदाचार-युताः सर्वैः भवनीयम् ,
राष्ट्रोन्नयनं सर्वैः करणीयम् ॥

(६)

मत-लोलुपा अद्य सर्वे नेतृगणाः,
राष्ट्र-विक्रेतुमपि ते समर्थमनाः।
अयि भरतवंशि! त्वया जागरणीयम् ,
राष्ट्रोन्नयनं सर्वैः करणीयम् ॥

●

मुद्रकेण,प्रकाशकेनडॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते'न्यू जे.एन. स्टेशनरी मार्ट' नामकेमुद्रणालये मुद्रापयित्वा' भारतोदयः' मासिकपत्रंप्राकाश्यंनीतंहरिद्वार-स्थितयाज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
सम्पादकः डॉ. हरिगोपालशास्त्री